गोविन्दाय नमो नमः स्वाहा । इत्यनेनाष्टो-
त्तरशतमष्टाविंशतिमष्टौ वा जुहुयात् । ततो
गुड़घृतेन वसोर्धारां भित्तौ दद्यात् । ततो
नाड़ीच्छेदं भावयेत् । ॐ षष्ठ्यै नम इति षष्ठीं
पूजयेत् । ततो भगवतः श्रीकृष्णस्य नामकरणान्न-
प्राशनचूड़ाकरणोपनयनोद्वाहसंस्कारान् भाव-
येत् । ततः प्रणवादिनमोऽन्तेन तत्तन्नामभिः
पूजयेत् । ॐ देवक्यै नमः एवं वसुदेवाय यशो-
दायै नन्दाय रोहिण्यै चण्डिकायै बलदेवाय
दक्षाय गर्गाय चतुर्मुखाय इत्यनेन यथाशक्ति
यथोपचारैः पूजयेत् । ततः शङ्खेन कुशपुष्प-
चन्दनजलान्यादाय भूमौ जानुनी पातयित्वा,
ॐ क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव ! ।
गृहाणार्घ्यं शशाङ्केदं रोहिण्या सहितो मम ॥
ॐ सोमाय सोमेश्वराय सोमपतये सोमसम्भवाय
गोविन्दाय नमो नमः । इत्यर्घ्यं दद्यात् । ततः
प्रणाममन्त्रौ ।
"ॐ ज्योत्स्नायाः पतये तुभ्यं ज्योतिषां पतये
नमः ।
नमस्ते रोहिणीकान्त ! सुधावास नमोऽस्तु ते ॥
नभोमण्डलदीपाय शिरोरत्नाय धूर्ज्जटेः ।
कलाभिर्वर्द्धमानाय नमश्चन्द्राय चारवे ॥"
ततश्च ।
"अनघं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम् ।
वासुदेवं हृषीकेशं माधवं मधुसूदनम् ॥
वराहं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम् ।
दामोदरं पद्मनाभं केशवं गरुड़ध्वजम् ॥
गोविन्दमच्युतं देवमनन्तमपराजितम् ।
अधोक्षजं जगद्बीजं सर्गस्थित्यन्तकारिणम् ॥
अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमम् ।
नारायणं चतुर्बाहुं शङ्खचक्रगदाधरम् ॥
पीताम्बरधरं नित्यं वनमालाविभूषितम् ।
श्रीवत्साङ्कं जगत्सेतुं श्रीकृष्णं श्रीधरं हरिम् ।
प्रपद्येऽहं सदा देवं सर्व्वकामप्रसिद्धये ॥"
इति स्तवः ॥
ततः प्रणमेत् ।
"प्रणमामि सदा देवं वासुदेवं जगत्पतिम् ।
त्राहि मां सर्व्वदेवेश हरे ! संसारसागरात् ॥"
ततः प्रार्थयेत् ।
"ॐ त्राहि मां सर्व्वपापघ्न दुःखशोकार्णवाद्धरे ! ।
सर्व्वलोकेश्वर त्राहि पतितं मां भवार्णवे ॥
देवकीनन्दन श्रीश हरे संसारसागरात् ।
त्राहि मां सर्व्वदुःखघ्न रोगशोकार्णवाद्धरे ! ॥
दुर्गतांस्त्रायसे विष्णो ये स्मरन्ति सकृत् सकृत् ।
सोऽहं देवातिदुर्व्वृत्तस्त्राहि मां दुःखसागरात् ॥
पुष्कराक्ष निमग्नोऽहं मायाविज्ञानसागरे ।
त्राहि मां देवदेवेश ! त्वत्तो नान्योऽस्ति
रक्षिता ॥"
इति प्रार्थयेत् ॥
"यद्बाल्ये यच्च कौमारे वार्द्धके यच्च यौवने ।
तत् पुण्यं वृद्धिमाप्नोतु पापं हर हलायुध ! ॥"
इति वदेत् ॥

ततो नृत्यगीतवादित्रस्तवैः कालं नयेत् । पर-
दिने प्रातःस्नानादिकं कृत्वा भगवन्तं श्रीकृष्णं
यथाविधि संपूज्य दुर्गायाश्च महोत्सवः कार्य्यः ।
ततो ब्राह्मणान् भोजयेत् तेभ्यो दक्षिणां दद्यात्
सुवर्णादि यत् किञ्चिदिष्टतमं श्रीकृष्णो मे प्रीयता-
मिति ।
"ॐ यं देवं देवकी देवी वसुदेवादजीजनत् ।
भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः ॥
सुब्रह्मवासुदेवाय गोब्राह्मणहिताय च ।
शान्तिरस्तु शिवञ्चास्तु इत्युक्त्वा विसर्ज्जयेत् ॥"
ततश्चोपवासपरदिने तिथिनक्षत्रयोरवसाने
पारणम् । यदा तु महानिशायाः पूर्व्वमेकतर-
स्यावसानं अन्यतरस्य महानिशायां तदनन्तरं
वा तदेकतरावसाने पारणम् । यदा तु महानि-
शायामुभयस्थितिः तदा उत्सवान्ते पारणं
कुर्य्यात् । तत्र मन्त्रः । ॐ सर्व्वाय सर्व्वेश्वराय
सर्व्वपतये सर्व्वसम्भवाय गोविन्दाय नमो नमः ।
पारणानन्तरन्तु समापनमन्त्रः । ॐ भूताय
भूतेश्वराय भूतपतये भूतसम्भवाय गोविन्दाय
नमो नमः । इत्यनेन व्रतं समापयेत् ॥ * ॥
भाद्रशुक्लपञ्चमीमधिकृत्य भविष्योत्तरे ।
"तथा भाद्रपदे मासि पञ्चम्यां श्रद्धयान्वितः ।
यस्त्वालिख्य नरो भक्त्या कृष्णवर्णादिवर्णकैः ।
पूजयेद्गन्धपुष्पैश्च सर्पिर्गुग्गुलुपायसैः ॥
तस्य तुष्टिं समायान्ति पन्नगास्तक्षकादयः ।
आसप्तमात् कुलात्तस्य न भयं सर्पतो भवेत् ।
तस्मात् सर्व्वप्रयत्नेन नागान् संपूजयेन्नरः ॥
इत्येवावेक्ष्य नागपञ्चमीति वाचस्पतिमिश्राः ।
आलेख्यनागाः कर्कोटकादयः पूर्व्वलिखिताः
पूजा च श्रावणपञ्चमीविहितेति बोध्यम् ॥ * ॥
अथ हरेः पार्श्वपरिवर्त्तनम् । तत्र द्वादश्यां
सन्धिसमये नक्षत्राणामसम्भवे । आभाका-
सितपक्षेषु शयनावर्त्तनादिकमिति ब्रह्मपुरा-
णात् । भाद्रशुक्लद्वादश्यां श्रवणमध्ययुक्तायां
सन्ध्यासमये द्वादश्यान्तस्याभावे एकादश्यादिषु
पादयोगे तदभावेऽपि द्वादश्यां केवलायां वा
कृताह्निकः सायं सन्ध्यायां देवं संपूज्य ।
"ॐ वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव ।
पार्श्वेन परिवर्त्तस्व सुखं स्वपिहि माधव ! ॥"
इति प्राञ्जलिः पठेत् ॥
"त्वयि सुप्ते जगन्नाथ ! जगत् सुप्तं भवेदिति ।
प्रबुद्धे त्वयि बुध्येत जगत् सर्व्वं चराचरम् ॥"
इत्यनेन पूजयेत् ॥ * ॥
अथ सिंहार्के चतुर्थ्यां चन्द्रदर्शनप्रायश्चित्तम् ।
सिंहार्कमधिकृत्य ब्रह्मपुराणम् ।
"नारायणोऽभिशप्तस्तु निशाकरमरीचिषु ।
स्थितश्चतुर्थ्यामद्यापि मनुष्याणां पतेच्च सः ॥
अतश्चतुर्थ्यां चन्द्रन्तु प्रमादाद्वीक्ष्य मानवः ।
पठेद्धात्रेयिकावाक्यं प्राङ्मुखो वाप्युदङ्मुखः ॥"
अभिशप्तो मिथ्यापरीवादविषयीभूतः । सोऽभि-
शापः अद्यापि मनुष्यान् पतेत् । ततश्च
प्राङ्मुख उदङ्मुखो वा कुशतिलजलान्यादाय

ॐ अद्येत्यादि सिंहार्कचतुर्थीचन्द्रदर्शनजन्य-
पापक्षयकामो धात्रेयीवाक्यमहं पठिष्ये । इति
संकल्प्य ।
"ॐ सिंहः प्रसेनमवधीत् सिंहो जाम्बवता
हतः ।
सुकुमारक ! मा रोदीस्तव ह्येष स्यमन्तकः ॥"
इति विष्णुपुराणोक्तं धात्रेयीवाक्यं पठेत् ॥ * ॥
अथागस्त्यव्रतम् । तत्र यद्दिने पूर्व्वाह्णलाभस्तद्दिने
व्रतम् । उभयदिने चेत् परदिने युग्मात् । व्रतानु-
ष्ठानविधिस्तु पद्धतौ ज्ञेयः ॥ * ॥ अथागस्त्यार्घ्य-
दानम् । प्रमाणन्तु तिथितत्त्वेऽनुसन्धेयम् ।
सिंहस्थरविकर्त्तव्यत्वेन सौरमासादरः । कन्यार्क-
संक्रान्तिपूर्व्वदिनत्रयाभ्यन्तरे कृतस्नानादिकृता-
ह्निकस्तिलकुशजलान्यादाय ॐ तत् सदित्युक्त्वा
ॐ अद्येत्यादि सर्व्वाभिलषितसिद्धिकामोऽगस्त्य-
पूजनमहं करिष्ये इति संकल्प्य शालग्रामे
जले वा दक्षिणामुखः एतत् पाद्यम् ॐ अग-
स्त्याय नमः । सितपुष्पाक्षतयुक्तं जलं शङ्खेन
गृहीत्वा इदमर्घ्यम् ।
ॐ काशपुष्पप्रतीकाश अग्निमारुतसम्भव ।
मित्रावरुणयोः पुत्त्र कुम्भयोने नमोऽस्तु ते ॥
ॐ अगस्त्याय नमः । एवमाचमनीयस्नानीय-
गन्धपुष्पधूपदीपनैवेद्यादिकं दद्यात् ।
ॐ आतापिर्भक्षितो येन वातापिश्च महासुरः ।
समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु ॥"
इति प्रार्थयेत् ॥ इति कृत्यतत्त्वम् ॥

भाद्रपदः, पुं, (भाद्रपदानक्षत्रयुक्ता पौर्णमासी
भाद्रपदी सा यत्र मासे सः । भाद्रपदी + अण् ।)
भाद्रमासः । इत्यमरः । १ । ४ । १७ ॥ (यथा,—
"ते तु भाद्रपदाद्येन द्विमासिकेन व्याख्याताः ।
तद्यथा । भाद्रपदाश्वयुजौ वर्षाः ।" इति
सुश्रुते सूत्रस्थाने षष्ठेऽध्याये ।)

भाद्रपदा, स्त्री, पूर्व्वभाद्रपदानक्षत्रम् । उत्तर-
भाद्रपदानक्षत्रम् । तत्पर्य्यायः । प्रौष्ठपदा २ ।
इत्यमरः । १ । ३ । २२ ॥

भाद्रमातुरः, पुं, (भद्रमातुरपत्यमिति । भद्रमातृ +
"मातुरुत्संख्यासम्भद्रपूर्व्वायाः ।" ४ । १ । ११५ ।
इति अण् । "उकाराचान्तादेशः ।" इति
काशिका ।) सतीतनयः । "सत्यास्तु तनये साम्मा-
तुरवद्भाद्रमातुरः ।" इति हेमचन्द्रः । ३ । २१० ॥

भानुः, पुं, (भाति चतुर्द्दशभुवनेषु स्वप्रभया दीप्यते
इति । भा + "दाभाभ्यां नुः ।" उणा० ३ ।
३२ । इति नुः ।) सूर्य्यः । (यथा, महा-
भारते । ३ । ३ । २४ ।
"अनन्तः कपिलो भानुः कामदः सर्व्वतोमुखः ।"
विष्णुः । यथा, तत्रैव । १३ । १४९ । २७ ।
"सर्व्वगः सर्व्वविद्भानुर्विष्वक्सेनो जनार्द्दनः ।"
प्राधायाः पुत्त्रभेदः । यथा, तत्रैव । १ । ६५ । ४८ ।
"विश्वावसुश्च भानुश्च सुचन्द्रो दशमस्तथा ।
इत्येता देवगन्धर्व्वा प्राधायाः परिकीर्त्तिताः ॥"
अङ्गिरःस्वरस्तपसः पुत्त्रभेदः । यथा, तत्रैव ।
३ । २२० । ८ ।